# 0 Shrimaddevibhagavatamahatmyam

# ૦ શ્રીમદ્દેવીભાગવતમાહાત્મ્યમ્

## Document Information

Text title : Devi Bhagavatamahatmya Importance of Devi Bhagavatam from Skandapuranam

File name : devIbhAgavatam00.itx

Category : purana, devI, devii, devibhagavatam

Location : doc_purana

Transliterated by : Vishwas Bhide, satsangdhara.net

Proofread by : Vishwas Bhide, satsangdhara.net

Description/comments : skandapurANe mAnasakhaNDe

Latest update : March 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 31, 2024

*sanskritdocuments.org*

# ૦ શ્રીમદ્દેવીભાગવતમાહાત્મ્યમ્

## ૦.૧ દેવીભાગવતમાહાત્મ્યમ્ । પ્રથમોઽધ્યાયઃ । દેવીભાગવતશ્રવણમાહામ્યવર્ણનમ્ ।

સૃષ્ટૌ યા સર્ગરૂપા જગદવનવિધૌ
પાલની યા ચ રૌદ્રી
સંહારે ચાપિ યસ્યા જગદિદમખિલં
ક્રીડનં યા પરાખ્યા ।
પશ્યન્તી મધ્યમાથો તદનુ ભગવતી
વૈખરી વર્ણરૂપા
સાસ્મદ્વાચં પ્રસન્ના વિધિહરિગિરિશા-
રાધિતાલઙ્કરોતુ ॥ ૧॥

નારાયણં નમસ્કૃત્ય નરં ચૈવ નરોત્તમમ્ ।
દેવીં સરસ્વતીં વ્યાસં તતો જયમુદીરયેત્ ॥ ૨॥

ઋષય ઊચુઃ ।
સૂત જીવ સમા બહ્વીર્યસ્ત્વં શ્રાવયસીહ નઃ ।
કથા મનોહરાઃ પુણ્યા વ્યાસશિષ્ય મહામતે ॥ ૩॥

સર્વપાપહરં પુણ્યં વિષ્ણોશ્ચરિતમદ્ભુતમ્ ।
અવતારકથોપેતમસ્માભિર્ભક્તિતઃ શ્રુતમ્ ॥ ૪॥

શિવસ્ય ચરિતં દિવ્યં ભસ્મરુદ્રાક્ષયોસ્તથા ।
સેતિહાસઞ્ચ માહાત્મ્યં શ્રુતં તવ મુખામ્બુજાત્ ॥ ૫॥

અધુના શ્રોતુમિચ્છામઃ પાવનાત્ પાવનં પરમ્ ।
ભુક્તિમુક્તિપ્રદં નૃણામનાયાસેન સર્વશઃ ॥ ૬॥

તત્ ત્વં બ્રૂહિ મહાભાગ યેન સિધ્યન્તિ માનવાઃ ।
કલાવપિ પરં ત્વત્તો ન વિદ્મઃ સંશયચ્છિદમ્ ॥ ૭॥

સૂત ઉવાચ ।

સાધુ પૃષ્ટં મહાભાગા લોકાનાં હિતકામ્યયા ।
સર્વશાસ્ત્રસ્ય યત્ સારં તદ્વો વક્ષ્યામ્યશેષતઃ ॥ ૮॥

તાવદ્ ગર્જન્તિ તીર્થાનિ પુરાણાનિ વ્રતાનિ ચ ।
યાવન્ન શ્રૂયતે સમ્યગ દેવીભાગવતં નરૈઃ ॥ ૯॥

તાવત્ પાપાટવી નૃણાં ક્લેશદાદભ્રકણ્ટકા ।
યાવન્ન પરશુઃ પ્રાપ્તો દેવીભાગવતાભિધઃ ॥ ૧૦॥

તાવત્ ક્લેશાવહં નૃણામુપસર્ગમહાતમઃ ।
યાવન્નૈવોદયં પ્રાપ્તો દેવીભાગવતોષ્ણગુઃ ॥ ૧૧॥

ઋષય ઊચુઃ ।
સૂત સૂત મહાભાગ વદ નો વદતાં વર ।
કીદૃશં તત્પુરાણં હિ વિધિસ્તચ્છ્રવણે ચ કઃ ॥ ૧૨॥

કતિભિર્વાસરૈરેતચ્છ્રોતવ્યં કિઞ્ચ પૂજનમ્ ।
કૈર્માનવૈઃ શ્રુતં પૂર્વં કાન્કાન્કામાનવાપ્નુયુઃ ॥ ૧૩॥

સૂત ઉવાચ ।
વિષ્ણોરંશો મુનિર્જાતઃ સત્યવત્યાં પરાશરાત્ ।
વિભજ્ય વેદાંશ્ચતુરઃ શિષ્યાનધ્યાપયત્પુરા ॥ ૧૪॥

વ્રાત્યાનાં દ્વિજબન્ધૂનાં વેદેષ્વનધિકારિણામ્ ।
સ્ત્રીણાં દુર્મેધસાં નૃણાં ધર્મજ્ઞાનં કથં ભવેત્ ॥ ૧૫॥

વિચાર્યૈતત્ તુ મનસા ભગવાન્ બાદરાયણઃ ।
પુરાણસંહિતાં દધ્યૌ તેષાં ધર્મવિધિત્સયા ॥ ૧૬॥

અષ્ટાદશ પુરાણાનિ સ કૃત્વા ભગવાન્ મુનિઃ ।
મામેવાધ્યાપયામાસ ભારતાખ્યાનમેવ ચ ॥ ૧૭॥

દેવીભાગવતં તત્ર પુરાણં ભોગમોક્ષદમ્ ।
સ્વયં તુ શ્રાવયામાસ જનમેજયભૂપતિમ્ ॥ ૧૮॥

પૂર્વમસ્ય પિતા રાજા પરીક્ષિત્ તક્ષકાહિના ।
સન્દષ્ટસ્તસ્ય સંશુધ્યૈ રાજ્ઞા ભાગવતં શ્રુતમ્ ॥ ૧૯॥

નવભિર્દિવસૈઃ શ્રીમદ્વેદવ્યાસમુખામ્બુજાત્ ।
ત્રૈલોક્યમાતરં દેવીં પૂજયિત્વા વિધાનતઃ ॥ ૨૦॥

નવાહયજ્ઞે સશ઼ૃર્ણે પરીક્ષિદપિ ભૂપતિઃ ।
દિવ્યરૂપધરો દેવ્યાઃ સાલોક્યં તત્ક્ષણાદગાત્ ॥ ૨૧॥

પિતુર્દિવ્યાં ગતિં રાજા વિલોક્ય જનમેજયઃ ।
વ્યાસં મુનિં સમભ્યર્ચ્ય પરાં મુદમવાપ હ ॥ ૨૨॥

અષ્ટાદશપુરાણાનાં મધ્યે સર્વોત્તમં પરમ્ ।
દેવીભાગવતં નામ ધર્મકામાર્થમોક્ષદમ્ ॥ ૨૩॥

યે શ઼ૃણ્વન્તિ સદા ભક્ત્યા દેવ્યા ભાગવતીં કથામ્ ।
તેષાં સિદ્ધિર્ન દૂરસ્થા તસ્માત્ સેવ્યા સદા નૃભિઃ ॥ ૨૪॥

દિનમર્ધં તદર્ધં વા મુહૂર્તં ક્ષણમેવ વા ।
યે શ઼ૃણ્વન્તિ નરા ભક્ત્યા ન તેષાં દુર્ગતિઃ ક્વચિત્ ॥ ૨૫॥

સર્વયજ્ઞેષુ તીર્થેષુ સર્વદાનેષુ યત્ ફલમ્ ।
સકૃત્ પુરાણશ્રવણાત્ તત્ ફલં લભતે નરઃ ॥ ૨૬॥

કૃતાદૌ બહવો ધર્માઃ કલૌ ધર્મસ્તુ કેવલમ્ ।
પુરાણશ્રવણાદન્યો વિદ્યતે નાપરો નૃણામ્ ॥ ૨૭॥

ધર્માચારવિહીનાનાં કલાવલ્પાયુષાં નૃણામ્ ।
વ્યાસો હિતાય વિદધે પુરાણાખ્યં સુધારસમ્ ॥ ૨૮॥

સુધાં પિબન્નેક એવ નરઃ સ્યાદજરામરઃ ।
દેવ્યાઃ કથામૃતં કુર્યાત્ કુલમેવાજરામરમ્ ॥ ૨૯॥

માસાનાં નિયમો નાત્ર દિનાનાં નિયમોઽપિ ન ।
સદા સેવ્યં સદા સેવ્યં દેવીભાગવતં નરૈઃ ॥ ૩૦॥

આશ્વિને મધુમાસે વા તપોમાસે શુચૌ તથા ।
ચતુર્ષુ નવરાત્રેષુ વિશેષાત્ ફલદાયકમ્ ॥ ૩૧॥

અતો નવાહયજ્ઞોઽયં સર્વસ્માત્ પુણ્યકર્મણઃ ।
ફલાધિકપ્રદાનેન પ્રોક્તઃ પુણ્યપ્રદો નૃણામ્ ॥ ૩૨॥

યે દુર્હૃદઃ પાપરતા વિમૂઢા
મિત્રદ્રુહો વેદવિનિન્દકાશ્ચ ।
હિંસારતા નાસ્તિકમાર્ગસક્તા
નવાહયજ્ઞેન પુનન્તિ તે કલૌ ॥ ૩૩॥

પરસ્વદારાહરણેઽતિલુબ્ધા
યે વૈ નરાઃ કલ્મષભારભાજઃ ।
ગોદેવતાબ્રાહ્મણભક્તિહીના
નવાહયજ્ઞેન ભવન્તિ શુદ્ધાઃ ॥ ૩૪॥

તપોભિરુગ્રૈર્વ્રતતીર્થસેવનૈ-
ર્દાનૈરનેકૈર્નિયમૈર્મખૈશ્ચ ।
હુતૈર્જપૈર્યચ્ચ ફલં ન લભ્યતે
નવાહયજ્ઞેન તદાપ્યતે નૃણામ્ ॥ ૩૫॥

તથા ન ગઙ્ગા ન ગયા ન કાશી
ન નૈમિષં નો મથુરા ન પુષ્કરમ્ ।
પુનાતિ સદ્યો બદરીવનં નો
યથા હિ દેવીમખ એષ વિપ્રાઃ ॥ ૩૬॥

અતો ભાગવતં દેવ્યાઃ પુરાણં પરતઃ પરમ્ ।
ધર્માર્થકામમોક્ષાણામુત્તમં સાધનં મતમ્ ॥ ૩૭॥

આશ્વિનસ્ય સિતે પક્ષે કન્યારાશિગતે રવૌ ।
મહાષ્ટમ્યાં સમભ્યર્ચ્ય હૈમસિંહાસનસ્થિતમ્ ॥ ૩૮॥

દેવીપ્રીતિપ્રદં ભક્ત્યા શ્રીભાગવતપુસ્તકમ્ ।
દદ્યાદ્ વિપ્રાય યોગ્યાય સ દેવ્યાઃ પદવીં લભેત્ ॥ ૩૯॥

દેવીભાગવતસ્યાપિ શ્લોકં શ્લોકાર્ધમેવ વા ।
ભક્ત્યા યશ્ચ પઠેન્નિત્યં સ દેવ્યાઃ પ્રીતિભાગ્ભવેત્ ॥ ૪૦॥

ઉપસર્ગભયં ઘોરં મહામારીસમુદ્ભવમ્ ।
ઉત્પાતાનખિલાંશ્ચાપિ હન્તિ શ્રવણમાત્રતઃ ॥ ૪૧॥

બાલગ્રહકૃતં યચ્ચ ભૂતપ્રેતકૃતં ભયમ્ ।
દેવીભાગવતસ્યાસ્ય શ્રવણાદ્ યાતિ દૂરતઃ ॥ ૪૨
યસ્તુ ભાગવતં દેવ્યાઃ પઠેદ્ ભક્ત્યા શ્રૃણોતિ વા ।
ધર્મમર્થં ચ કામં ચ મોક્ષં ચ લભતે નરઃ ॥ ૪૩॥

શ્રવણાદ્વસુદેવોઽસ્ય પ્રસેનાન્વેષણે ગતમ્ ।
ચિરાયિતં પ્રિયં પુત્રં કૃષ્ણં લબ્ધ્વા મુમોદ હ ॥ ૪૪॥

ય એતાં શ◌ૃણુયાદ્ ભક્ત્યા શ્રીમદ્ભાગવતીં કથામ્ ।

ભુક્તિં ભુક્તિં સ લભતે ભક્ત્યા યશ્ચ પઠેદિમામ્ ॥ ૪૫॥

અપુત્રો લભતે પુત્રં દરિદ્રો ધનવાન્ ભવેત્ ।
રોગી રોગાત્ પ્રમુચ્યેત શ્રુત્વા ભાગવતામૃતમ્ ॥ ૪૬॥

વન્ધ્યા વા કાકવન્ધ્યા વા મૃતવત્સા ચ યાઙ્ગના ।
દેવીભાગવતં શ્રુત્વા લભેત્ પુત્રં ચિરાયુષમ્ ॥ ૪૭॥

પૂજિતં યદ્ગૃહે નિત્યં શ્રીભાગવતપુસ્તકમ્ ।
તદ્ગૃહં તીર્થભૂતં હિ વસતાં પાપનાશકમ્ ॥ ૪૮॥

અષ્ટમ્યાં વા ચતુર્દશ્યાં નવમ્યાં ભક્તિસંયુતઃ ।
યઃ પઠેચ્છૃણુયાદ્ વાપિ સ સિદ્ધિં લભતે પરામ્ ॥ ૪૯॥

પઠન્ દ્વિજો વેદવિદગ્રણીર્ભવેદ્
બાહુપ્રજાતો ધરણીપતિઃ સ્યાત્ ।
વૈશ્યઃ પઠન્ વિત્તસમૃદ્ધિમેતિ
શૂદ્રોઽપિ શ઼ૃણ્વન્સ્વકુલોત્તમઃ સ્યાત્ ॥ ૫૦॥

ઇતિ શ્રીસ્કન્દપુરાણે માનસખણ્ડે શ્રીમદ્દેવીભાગવતમાહાત્મ્યે
દેવીભાગવતશ્રવણમાહામ્યવર્ણનં નામ પ્રથમોઽધ્યાયઃ ॥ ૦.૧॥

## ૦.૨ દેવીભાગવતમાહાત્મ્યમ્ । દ્વિતીયોઽધ્યાયઃ । વસુદેવસ્ય દેવીભાગવતનવાહ-શ્રવણાત્પુત્રપ્રાપ્તિવર્ણનમ્ ।

ઋષય ઊચુઃ ।
વસુદેવો મહાભાગઃ કથં પુત્રમવાપ્તવાન્ ।
પ્રસેનઃ કુત્ર કૃષ્ણેન ભ્રમતાન્વેષિતઃ કથમ્ ॥ ૧॥

વિધિના કેન કસ્માચ્ચ દેવીભાગવતં શ્રુતમ્ ।
વસુદેવેન સુમતે વદ સૂત કથામિમામ્ ॥ ૨॥

સૂત ઉવાચ ।
સત્રાજિદ્ ભોજવંશીયો દ્વારવત્યાં સુખં વસન્ ।
સૂર્યસ્યારાધને યુક્તો ભક્તશ્ચ પરમઃ સખા ॥ ૩॥

અથ કાલેન કિયતા પ્રસન્નઃ સવિતાભવત્ ।
સ્વલોકં દર્શયામાસ તદ્ભક્ત્યા પ્રણયેન ચ ॥ ૪॥

તસ્મૈ પ્રીતશ્ચ ભગવાન્ સ્યમન્તકમણિં દદૌ ।
સ તં બિભ્રન્મણિ કણ્ઠે દ્વારકામાજગામ હ ॥ ૫॥

દૃષ્ટ્વા તં તેજસા ભ્રાન્તા મત્વાદિત્યં પુરૌકસઃ ।
કૃષ્ણમૂચુઃ સમભ્યેત્ય સુધર્માયામવસ્થિતમ્ ॥ ૬॥

એષ આયાતિ સવિતા દિદૃક્ષુસ્ત્વાં જગત્પતે ।
શ્રુત્વા કૃષ્ણસ્તુ તદ્વાચં પ્રહસ્યોવાચ સંસદિ ॥ ૭॥

સવિતા નૈષ ભો બાલાઃ સત્રાજિન્મણિના જ્વલન્ ।
સ્યમન્તકેન ચાયાતિ ભાસ્વદ્દત્તેન ભાસ્વતા ॥ ૮॥

અથ વિપ્રાન્ સમાહૂય સ્વસ્તિવાચનપૂર્વકમ્ ।
પ્રાવેશયત્સમભ્યર્ચ્ય સત્રાજિત્સ્વગૃહે મણિમ્ ॥ ૯॥

ન તત્ર મારી દુર્ભિક્ષં નોપસર્ગભયં ક્વચિત્ ।
યત્રાસ્તે સ મણિર્નિત્યમષ્ટભારસુવર્ણદઃ ॥ ૧૦॥

અથ સત્રાજિતો ભ્રાતા પ્રસેનો નામ કર્હિચિત્ ।
કણ્ઠે બદ્ધ્વા મણિં સદ્યો હયમારુહ્ય સૈન્ધવમ્ ॥ ૧૧॥

મૃગયાર્થં વનં યાતસ્તમદ્રાક્ષીન્નગાધિપઃ ।
પ્રસેનં સહયં હત્વા સિંહો જગ્રાહ તં મણિમ્ ॥ ૧૨॥

જામ્બવાનૃક્ષરાજોઽથ દૃષ્ટ્વા મણિધરં હરિમ્ ।
હત્વા ચ તં બિલદ્વારિ મણિં જગ્રાહ વીર્યવાન્ ॥ ૧૩॥

સ તં મણિં સ્વપુત્રાય ક્રીડનાર્થમદાત્ પ્રભુઃ ।
અથ ચિક્રીડબાલોઽપિ મણિસમ્માપ્ય ભાસ્વરમ્ ॥ ૧૪॥

પ્રસેનેઽનાગતે ચાથ સત્રાજિત્ પર્યતપ્યત ।
ન જાને કેન નિહતઃ પ્રસેનો મણિમિચ્છતા ॥ ૧૫॥

અથ લોકમુખોદ્ગીર્ણા કિંવદન્તી પુરેઽભવત્ ।
કૃષ્ણેન નિહતો નૂનં પ્રસેનો મણિલિપ્સુના ॥ ૧૬॥

સ તં શુશ્રાવ કૃષ્ણોઽપિ દુર્યશો લિપ્તમાત્મનિ ।
માસ્તુ તત્તસ્ય પદવીં પુરૌકોભિસ્સહાગમત્ ॥ ૧૭॥

ગત્વા સ વિપિનેઽપશ્યત્ પ્રસેનં હરિણા હતમ્ ।
યયૌ મૃગેન્દ્રમન્વિષ્યન્નસૃગ્બિન્દ્વઙ્કિતાધ્વના ॥ ૧૮॥

અથ કૃષ્ણો હતં સિંહં બિલદ્વારિ વિલોક્ય ચ ।
ઉવાચ ભગવાન્ વાચં કૃપયા પુરવાસિનઃ ॥ ૧૯॥

તિષ્ઠધ્વં યૂયમત્રૈવ યાવદાગમનં મમ ।
પ્રવિશામિ બિલં ત્વેતન્મણિહારકલબ્ધયે ॥ ૨૦॥

તથેત્યુક્ત્વા તુ તે તસ્તુસ્તત્રૈવ દ્વારકૌકસઃ ।
જગામાન્તર્બિલં કૃષ્ણો યત્ર જામ્બવતો ગૃહમ્ ॥ ૨૧॥

ઋક્ષરાજસુતં દૃષ્ટ્વા કૃષ્ણો મણિધરં તદા ।
હર્તુમૈચ્છન્મણિં તાવદ્ ધાત્રી ચુક્રોશ ભીતવત્ ॥ ૨૨॥

શ્રુત્વા ધાત્રીરવં સદ્યઃ સમાગત્યર્ક્ષરાટ્ તદા ।
યુયુધે સ્વામિના સાકમવિશ્રમમહર્નિશમ્ ॥ ૨૩॥

એવં ત્રિનવરાત્રં તુ મહદ્યુદ્ધમભૂત્તયોઃ ।
કૃષ્ણાગમં પ્રતીક્ષન્તસ્તસ્મૃર્દ્વારિ પુરૌકસઃ ॥ ૨૪॥

દ્વાદશાહં તતો ભીત્યા પ્રતિજગ્મુર્નિજાલયમ્ ।
તત્ર તે કથયામાસુર્વૃત્તાન્તં સર્વમાદિતઃ ॥ ૨૫॥

સત્રાજિતં શપન્તસ્તે સર્વે શોકાકુલા ભૃશમ્ ।
વસુદેવો મહાભાગઃ શ્રુત્વા પુત્રસ્ય તાં કથામ્ ॥ ૨૬॥

મુમોહ સપરીવારસ્તદા પરમયા શુચા ।
ચિન્તયામાસ બહુધા કથં શ્રેયો ભવેન્મમ ॥ ૨૭॥

અથાજગામ ભગવાન્ દેવર્ષિર્બ્રહ્મલોકતઃ ।
ઉત્થાય તં પ્રણમ્યાસૌ વસુદેવોઽભ્યપૂજયત્ ॥ ૨૮॥

નારદોઽનામયં પૃષ્ટ્વા વસુદેવં મહામતિમ્ ।
પપ્રચ્છ ચ યદુશ્રેષ્ઠં કિં ચિન્તયસિ તદ્ વદ ॥ ૨૯॥

વસુદેવ ઉવાચ ।
પુત્રો મેઽતિપ્રિયઃ કૃષ્ણઃ પ્રસેનાન્વેષણાય તુ ।
પૌરૈઃ સાકં વનં ગત્વા નિહતં તં તદૈક્ષત ॥ ૩૦॥

પ્રસેનઘાતકં દૃષ્ટ્વા બિલદ્વારે મૃતં હરિમ્ ।
દ્વારિ પૌરાનધિષ્ઠાપ્ય બિલાન્તર્ગતવાન્ સ્વયમ્ ॥ ૩૧॥

બહવો દિવસા યાતા નાયાત્યદ્યાપિ મે સુતઃ ।
અતઃ શોચામિ તદ્ બ્રૂહિ યેન લપ્સ્યે સુતં મુને ॥ ૩૨॥

નારદ ઉવાચ ।
પુત્રપ્રાપ્ત્યૈ યદુશ્રેષ્ઠ દેવીમારાધયામ્બિકામ્ ।
તસ્યા આરાધનેનૈવ સદ્યઃ શ્રેયો હ્યવાપ્સ્યસિ ॥ ૩૩॥

વસુદેવ ઉવાચ ।
ભગવન્ કા હિ સા દેવી કિમ્પ્રભાવા મહેશ્વરી ।
કથમારાધનં તસ્યા દેવર્ષે કૃપયા વદ ॥ ૩૪॥

નારદ ઉવાચ ।
વસુદેવ મહાભાગ શ‍ૃણુ સઙ્ક્ષેપતો મમ ।
દેવ્યા માહાત્મ્યમતુલં કો વક્તું વિસ્તરાત્ ક્ષમઃ ॥ ૩૫॥

યા સા ભગવતી નિત્યા સચ્ચિદાનન્દરૂપિણી ।
પરાત્પરતરા દેવી યયા વ્યાપ્તમિદં જગત્ ॥ ૩૬॥

યદારાધનતો બ્રહ્મા સૃજતીદં ચરાચરમ્ ।
યાં ચ સ્તુત્વા વિનિર્મુક્તો મધુકૈટભજાદ્ ભયાત્ ॥ ૩૭॥

વિષ્ણુર્યત્કૃપયા વિશ્વં બિભર્તિ ભગવાનિદમ્ ।
રુદ્રઃ સંહરતે યસ્યાઃ કૃપાપાઙ્ગનિરીક્ષણાત્ ॥ ૩૮॥

સંસારબન્ધહેતુર્યા સૈવ મુક્તિપ્રદાયિની ।
સા વિદ્યા પરમા દેવી સૈવ સર્વેશ્વરેશ્વરી ॥ ૩૯॥

નવરાત્રવિધાનેન સમ્પૂજ્ય જગદમ્બિકામ્ ।
નવાહોભિઃ પુરાણં ચ દેવ્યા ભાગવતં શ‍ૃણુ ॥ ૪૦॥

યસ્ય શ્રવણમાત્રેણ સદ્યઃ પુત્રમવાપ્સ્યસિ ।
ભુક્તિર્મુક્તિર્ન દૂરસ્થા પતતાં શ‍ૃણ્વતાં નૃણામ્ ॥ ૪૧॥

ઇત્યુક્તો નારદેનાસૌ વસુદેવઃ પ્રણમ્ય તમ્ ।
ઉવાચ પરયા પ્રીત્યા નારદં મુનિસત્તમમ્ ॥ ૪૨॥

વસુદેવ ઉવાચ ।
ભગવંસ્તવ વાક્યેન સંસ્મૃતં વૃત્તમાત્મનઃ ।
શ્રૂયતાં તચ્ચ વક્ષ્યામિ દેવીમાહાત્મ્યસમ્ભવમ્ ॥ ૪૩॥

પુરા નભોગિરા કંસો દેવક્યષ્ટમગર્ભતઃ ।
જ્ઞાત્વાત્મમૃત્યું પાપો માં સભાર્યં ન્યરુણદ્ભિયા ॥ ૪૪॥

કારાગારેઽહમવસં દેવક્યા સહ ભાર્યયા ।
જાતં જાતં સમવધીત્પુત્રં કંસોઽપિ પાપકૃત્ ॥ ૪૫॥

ષટ્ પુત્રા નિહતાસ્તેન તદા શોકાકુલા ભૃશમ્ ।
અતપ્યદ્ દેવકી દેવી નક્તન્દિવમનિન્દિતા ॥ ૪૬॥

તદાહં ગર્ગમાહૂય મુનિં નત્વાભિપૂજ્ય ચ ।
નિવેદ્ય દેવકીદુઃખમવોચં પુત્રકામ્યયા ॥ ૪૭॥

ભગવન્ કરુણાસિન્ધો યાદવાનાં ગુરુર્ભવાન્ ।
આયુષ્મત્પુત્રસમ્પ્રાપ્તિસાધનં વદ મે મુને ॥ ૪૮॥

તતો ગર્ગઃ પ્રસન્નાત્મા મામુવાચ દયાનિધિઃ ।
ગર્ગ ઉવાચ ।
વસુદેવ મહાભાગ શ‍ૃણુ તત્ સાધનં પરમ્ ॥ ૪૯॥

યા સા ભગવતી દુર્ગા ભક્તદુર્ગતિહારિણી ।
તામારાધય કલ્યાણીં સદ્યઃ શ્રેયો હ્યવાપ્સ્યસિ ॥ ૫૦॥

યદારાધનતઃ સર્વે સર્વાન્ કામાનવાપ્નુયુઃ ।
ન કિઞ્ચિદ્દુર્લભં લોકે દુર્ગાર્ચનવતાં નૃણામ્ ॥ ૫૧॥

ઇત્યુક્તોઽહં મુદા યુક્તઃ સભાર્યો મુનિપુઙ્ગવમ્ ।
પ્રણમ્ય પરયા ભક્ત્યા પ્રાવોચં વિહિતાઞ્જલિઃ ॥ ૫૨॥

વસુદેવ ઉવાચ ।
યદ્યસ્તિ ભગવન્ પ્રીતિર્મયિ તે કરુણાનિધે ।
તદા ગુરો મદર્થે ત્વં સમારાધય ચણ્ડિકામ્ ॥ ૫૩॥

નિરુદ્ધઃ કંસગેહેઽહં ન કિઞ્ચિત્ કર્તુમુત્સહે ।
અતસ્ત્વમેવ દુઃખાબ્ધેર્મામુદ્ધર મહામતે ॥ ૫૪॥

ઇત્યુક્તસ્તુ મયા પ્રીતઃ પ્રોવાચ મુનિપુઙ્ગવઃ ।
વસુદેવ તવ પ્રીત્યા કરિષ્યામિ હિતં તવ ॥ ૫૫॥

અથ ગર્ગમુનિઃ પ્રીત્યા મયા સમ્પ્રાર્થિતોઽગમત્ ।
આરિરાધયિષુર્દુર્ગાં વિન્ધ્યાદ્રિં બ્રાહ્મણૈઃ સહ ॥ ૫૬॥

તત્ર ગત્વા જગદ્ધાત્રીં ભક્તાભીષ્ટપ્રદાયિનીમ્ ।
આરાધયામાસ મુનિર્જપપાઠપરાયણઃ ॥ ૫૭॥

તતઃ સમાપ્તે નિયમે વાગુવાચાશરીરિણી ।
પ્રસન્તાહં મુને કાર્યસિદ્ધિસ્તવ ભવિષ્યતિ ॥ ૫૮॥

ભૂભારહરણાર્થાય મયા સમ્મેરિતો હરિઃ ।
વસુદેવસ્ય દેવક્યાં સ્વાંશેનાવતરિષ્યતિ ॥ ૫૯॥

કંસભીત્યા તમાદાય બાલમાનકદુન્દુભિઃ ।
પ્રાપયિષ્યતિ સદ્યસ્તુ ગોકુલે નન્દવેશ્મનિ ॥ ૬૦॥

યશોદાતનયાં નીત્વા સ્વગૃહે કંસભૂભુજે ।
દાસ્યત્યથ ચ તાં હન્તું કંસ આક્ષેક્ષ્યતિ ક્ષિતૌ ॥ ૬૧॥

સા તદ્ધસ્તાદ્ વિનિર્ગત્ય સદ્યો દિવ્યવપુર્ધરા ।
મદંશભૂતા વિન્ધ્યાદ્રૌ કરિષ્યતિ જગદ્ધિતમ્ ॥ ૬૨॥

ઇતિ તદ્વચનં શ્રુત્વા પ્રણમ્ય જગદમ્બિકામ્ ।
ગર્ગો મુનિઃ પ્રસન્નાત્મા મથુરામાગમત્ પુરીમ્ ॥ ૬૩॥

વરદાનં મહાદેવ્યા ગર્ગાચાર્યમુખાદહમ્ ।
શ્રુત્વા સભાર્યઃ સમ્પ્રીતઃ પરાં મુદમથાગમમ્ ॥ ૬૪॥

તદારભ્ય પરં જાને દેવીમાહાત્મ્યમુત્તમમ્ ।
અધુનાપિ હિ દેવર્ષે શ્રુતં તવ મુખામ્બુજાત્ ॥ ૬૫॥

અતો ભાગવતં દેવ્યાસ્ત્વમેવ શ્રાવય પ્રભો ।
મદ્ભાગ્યાદેવ દેવર્ષે સશ્રાન્તોઽસિ દયાનિધે ॥ ૬૬॥

વસુદેવવચઃ શ્રુત્વા નારદઃ પ્રીતમાનસઃ ।
સુદિને શુભનક્ષત્રે કથારમ્ભમથાકરોત્ ॥ ૬૭॥

કથાવિઘ્નવિઘાતાર્થં દ્વિજા જેપુર્નવાક્ષરમ્ ।
માર્કણ્ડેયપુરાણોક્તં પેઠુર્દેવ્યાઃ સ્તવં તથા ॥ ૬૮॥

પ્રથમસ્કન્ધમારભ્ય શ્રીનારદમુખોદ્ગતમ્ ।
શુશ્રાવ વસુદેવશ્ચ ભક્ત્યા ભાગવતામૃતમ્ ॥ ૬૯॥

નવમેઽહ્નિ કથાપૂર્તૌ પુસ્તકં વાચકં તથા ।
પ્રસન્નઃ પૂજયામાસ વસુદેવો મહામનાઃ ॥ ૭૦॥

અથ તત્ર બિલસ્યાન્તઃ કૃષ્ણજામ્બવતોર્મૃધે ।
કૃષ્ણમુષ્ટિવિનિષ્પાતશ્લથાઙ્ગો જામ્બવાનભૂત્ ॥ ૭૧॥

અથાગતસ્મૃતિઃ સોઽપિ ભગવન્તં પ્રણમ્ય ચ ।
ઉવાચ પરયા ભક્ત્યા સ્વાપરાધં ક્ષમાપયન્ ॥ ૭૨॥

જ્ઞાતોઽસિ રઘુવર્યસ્ત્વં યદ્રોષાત્ સરિતામ્પતિઃ ।
ક્ષોભં જગામ લઙ્કા ચ રાવણઃ સાનુગો હતઃ ॥ ૭૩॥

સ એવાસિ ભવાન્કૃષ્ણ મદ્દૌરાત્મ્યં ક્ષમસ્વ ભોઃ ।
બ્રૂહિ યત્ કરણીયં મે ભૃત્યોઽહં તવ સર્વથા ॥ ૭૪॥

શ્રુત્વા જામ્બવતો વાચમબ્રવીજ્જગદીશ્વરઃ ।
મણિહેતોરિહ પ્રાપ્તા વયમૃક્ષપતે બિલમ્ ॥ ૭૫॥

ઋક્ષરાજસ્તતઃ પ્રીત્યા કન્યાં જામ્બવતીં નિજામ્ ।
દદૌ કૃષ્ણાય સમ્પૂજ્ય સ્યમન્તકમણિં તથા ॥ ૭૬॥

સ તાં પત્નીં સમાદાય મણિં કણ્ઠે તથાદધત્ ।
અભિમન્ત્ર્યર્ક્ષરાજઞ્ચ પ્રતસ્થે દ્વારકાં પ્રતિ ॥ ૭૭॥

કથાસમાપ્તિદિવસે વસુદેવ ઉદારધીઃ ।
બ્રાહ્મણાન્ ભોજયામાસ દક્ષિણાભિરતોષયત્ ॥ ૭૮॥

આશીર્વાચં પ્રયુઞ્જાના દ્વિજા યત્સમયે હરિઃ ।
આજગામ ક્ષણે તસ્મિન્ પત્ન્યા સહ મણિં દધત્ ॥ ૭૯॥

ભાર્યયા સહિતં કૃષ્ણં વસુદેવપુરોગમાઃ ।
દૃષ્ટ્વા હર્ષાશ્રુપૂર્ણાક્ષાઃ સમવાપુઃ પરાં મુદમ્ ॥ ૮૦॥

દેવર્ષિર્નારદશ્ચાથ કૃષ્ણાગમનહર્ષિતઃ ।
આમન્ત્ર્ય વસુદેવં ચ કૃષ્ણં બ્રહ્મસભાં યયૌ ॥ ૮૧॥

હરિચરિતમિદં યત્કીર્તિતં દુર્યશોઘ્નં
પતતિ વિમલભક્ત્યા શુદ્ધચિત્તઃ શ઼ૃણોતિ ।
સ ભવતિ સુખપૂર્ણઃ સર્વદા સિદ્ધકામો
જગતિ ચ વપુષોઽન્તે મુક્તિમાર્ગં લભેચ્ચ ॥ ૮૨॥

ઇતિ શ્રીસ્કન્દપુરાણે માનસખણ્ડે શ્રીમદ્દેવીભાગવતમાહાત્મ્યે

વસુદેવસ્ય દેવીભાગવતનવાહ-શ્રવણાત્પુત્રપ્રાપ્તિવર્ણનં નામ દ્વિતીયોઽધ્યાયઃ ॥ ૦.૨॥

## ૦.૩ દેવીભાગવતમાહાત્મ્યમ્ । તૃતીયોઽધ્યાયઃ । દેવીભાગવત-નવાહશ્રવણાદ્ ઇલાયાઃ પુંસ્ત્વપ્રાપ્તિવર્ણનમ્ ।

સૂત ઉવાચ ।
અથેતિહાસમન્યચ્ચ શ‍ૃણુધ્વં મુનિસત્તમાઃ ।
દેવીભાગવતસ્યાસ્ય માહાત્મ્યં યત્ર ગીયતે ॥ ૧॥

એકદા કુમ્ભયોનિસ્તુ લોપામુદ્રાપતિર્મુનિઃ ।
ગત્વા કુમારમભ્યર્ચ્ય પપ્રચ્છ વિવિધાઃ કથાઃ ॥ ૨॥

સ તસ્મૈ ભગવાન્ સ્કન્દઃ કથયામાસ ભૂરિશઃ ।
દાનતીર્થવ્રતાદીનાં માહાત્મ્યોપચિતાઃ કથાઃ ॥ ૩॥

વારાણસ્યાશ્ચ માહાત્મ્યં મણિકર્ણીભવં તથા ।
ગઙ્ગાયાશ્ચાપિ તીર્થાનાં વર્ણિતં બહુવિસ્તરમ્ ॥ ૪॥

શ્રુત્વાથ સ મુનિઃ પ્રીતઃ કુમારં ભૂરિવર્ચસમ્ ।
પુનઃ પપ્રચ્છ લોકાનાં હિતાર્થં કુમ્ભસમ્ભવઃ ॥ ૫॥

અગસ્ત્ય ઉવાચ ।
ભગવંસ્તારકારાતે દેવીભાગવતસ્ય તુ ।
માહાત્મ્યં શ્રવણે તસ્ય વિધિં ચાપિ વદ પ્રભો ॥ ૬॥

દેવીભાગવતં નામ પુરાણં પરમોત્તમમ્ ।
ત્રૈલોક્યજનની સાક્ષાદ્ ગીયતે યત્ર શાશ્વતી ॥ ૭॥

સ્કન્દ ઉવાચ ।
શ્રીભાગવતમાહામ્ય કો વક્તું વિસ્તરાત્ ક્ષમઃ ।
શ‍ૃણુ સઙ્ક્ષેપતો બ્રહ્મન્ કથયિષ્યામિ સામ્પ્રતમ્ ॥ ૮॥

યા નિત્યા સચ્ચિદાનન્દરૂપિણી જગદમ્બિકા ।
સાક્ષાત્ સમાશ્રિતા યત્ર ભુક્તિમુક્તિપ્રદાયિની ॥ ૯॥

અતસ્તદ્વાઙ્ગમયી મૂર્તિર્દેવીભાગવતે મુને ।
પઠનાચ્છ્રવણાદ્યસ્ય ન કિઞ્ચિદિહ દુર્લભમ્ ॥ ૧૦॥

આસીદ્વિવસ્વતઃ પુત્રઃ શ્રાદ્ધદેવ ઇતિ શ્રુતઃ ।

સોઽનપત્યોઽકરોદિષ્ટિં વસિષ્ઠાનુમતો નૃપઃ ॥ ૧૧॥

હોતારં પ્રાર્થયામાસ શ્રદ્ધાથ દયિતા મનોઃ ।
કન્યા ભવતુ મે બ્રહ્મંસ્તથોપાયો વિધીયતામ્ ॥ ૧૨॥

મનસા ચિન્તયન્ હોતા કન્યામેવાજુહોદ્ધવિઃ ।
તતસ્તદ્વ્યભિચારેણ કન્યેલા નામ ચાભવત્ ॥ ૧૩॥

અથ રાજા સુતાં દૃષ્ટ્વા પ્રોવાચ વિમના ગુરુમ્ ।
કથં સઙ્કલ્પવૈષમ્યમિહ જાતં પ્રભો તવ ॥ ૧૪॥

તચ્છ્રુત્વા સ મુનિર્દધ્યૌ જ્ઞાત્વા હોતુર્વ્યતિક્રમમ્ ।
ઈશ્વરં શરણં યાત ઇલાયાઃ પુંસ્ત્વકામ્યયા ॥ ૧૫॥

મુનેસ્તપઃપ્રભાવાચ્ચ પરેશાનુગ્રહાત્તથા ।
પશ્યતાં સર્વલોકાનામિલા પુરુષતામગાત્ ॥ ૧૬॥

ગુરુણા કૃતસંસ્કારઃ સુદ્યુમ્નોઽથ મનોઃ સુતઃ ।
નિધિર્બભૂવ વિદ્યાનાં સરિતામિવ સાગરઃ ॥ ૧૭॥

અથ કાલેન સુદ્યુમ્નસ્તારુણ્યં સમવાપ્ય ચ ।
મૃગયાર્થં વનં યાતો હયમારુહ્ય સૈન્ધવમ્ ॥ ૧૮॥

વનાદ્ વનાન્તરં ગચ્છન્ બહુ બભ્રામ સાનુગઃ ।
દૈવાદધસ્તાદ્ધેમાદ્રેઃ સ કુમારો વનં યયૌ ॥ ૧૯॥

કસ્મિંશ્ચિત્ સમયે યત્ર ભાર્યયાપર્ણયા સહ ।
અરમદ્દેવદેવસ્તુ શઙ્કરો ભગવાન્ મુદા ॥ ૨૦॥

તદા તુ મુનયસ્તત્ર શિવદર્શનલાલસાઃ ।
આજગ્મુરથ તાન્ દૃષ્ટ્વા ગિરિજા વ્રીડિતાભવત્ ॥ ૨૧॥

રમમાણૌ તુ તૌ દૃષ્ટ્વા ગિરિશૌ સંશિતવ્રતાઃ ।
નિવૃત્તા મુનયો જગ્મુર્વૈકુણ્ઠનિલયં તદા ॥ ૨૨॥

પ્રિયાયાઃ પ્રિયમન્વિચ્છઞ્છિવોઽરણ્યં શશાપ હ ।
અદ્યારભ્ય વિશેદ્યોઽત્ર પુમાન્ યોષિદ્ ભવેદિતિ ॥ ૨૩॥

તત આરભ્ય તં દેશં પુરુષા વર્જયન્તિ હિ ।
તત્ર પ્રવિષ્ટઃ સુદ્યુમ્નો બભૂવ પ્રમદોત્તમા ॥ ૨૪॥

સ્ત્રીભૂતાનનુગાનશ્વં વડવાં વીક્ષ્ય વિસ્મિતઃ ।
અથ સા સુન્દરી યોષા વિચચાર વને વને ॥ ૨૫॥

એકદા સા જગામાથ બુધસ્યાશ્રમસન્નિધૌ ।
દૃષ્ટ્વા તાં ચારુસર્વાઙ્ગીં પીનોન્નતપયોધરામ્ ॥ ૨૬॥

બિમ્બોષ્ઠીં કુન્દદશનાં સુમુખીમુત્પલેક્ષણામ્ ।
અનઙ્ગશરવિદ્ધાઙ્ગશ્ચકમે ભગવાન્ બુધઃ ॥ ૨૭॥

સાપિ તં ચકમે સુભ્રૂઃ કુમારં સોમનન્દનમ્ ।
તતસ્તસ્યાશ્રમેઽવાત્સીદ્રમમાણા બુધેન સા ॥ ૨૮॥

અથ કાલેન કિયતા પુરૂરવસમાત્મજમ્ ।
સ તસ્યાં જનયામાસ મિત્રાવરુણસમ્ભવ ॥ ૨૯॥

અથ વર્ષેષુ યાતેષુ કદાચિત્ સા બુધાશ્રમે ।
સ્મૃત્વા સ્વં પૂર્વવૃત્તાન્તં દુઃખિતા નિર્જગામ હ ॥ ૩૦॥

ગુરોરથાશ્રમં ગત્વા વસિષ્ઠસ્ય પ્રણમ્ય તમ્ ।
નિવેદ્ય વૃત્તં શરણં યયૌ પુંસ્ત્વમભીપ્સતી ॥ ૩૧॥

વસિષ્ઠો જ્ઞાતવૃત્તાન્તો ગત્વા કૈલાસપર્વતમ્ ।
સમ્પૂજ્ય શમ્ભું તુષ્ટાવ ભક્ત્યા પરમયા યુતઃ ॥ ૩૨॥

વસિષ્ઠ ઉવાચ ।
નમો નમઃ શિવાયાસ્તુ શઙ્કરાય કપર્દિને ।
ગિરિજાર્ધાઙ્ગદેહાય નમસ્તે ચન્દ્રમૌલયે ॥ ૩૩॥

મૃડાય સુખદાત્રે તે નમઃ કૈલાસવાસિને ।
નીલકણ્ઠાય ભક્તાનાં ભુક્તિમુક્તિપ્રદાયિને ॥ ૩૪॥

શિવાય શિવરૂપાય પ્રપન્નભયહારિણે ।
નમો વૃષભવાહાય શરણ્યાય પરાત્મને ॥ ૩૫॥

બ્રહ્મવિષ્ણ્વીશરૂપાય સર્ગસ્થિતિલયેષુ ચ ।
નમો દેવાધિદેવાય વરદાય પુરારયે ॥ ૩૬॥

યજ્ઞરૂપાય યજતાં ફલદાત્રે નમો નમઃ ।
ગઙ્ગાધરાય સૂર્યેન્દુશિખિનેત્રાય તે નમઃ ॥ ૩૭॥

એવં સ્તુતઃ સ ભગવાન્ પ્રાદુરાસીજ્જગત્પતિઃ ।

વૃષારૂઢોઽમ્બિકોપેતઃ કોટિસૂર્યસમપ્રભઃ ॥ ૩૮
રજતાચલસઙ્કાશસ્ત્રિનેત્રશ્ચન્દ્રશેખરઃ ।
પ્રણતં પરિતુષ્ટાત્મા પ્રોવાચ મુનિસત્તમમ્ ॥ ૩૯ ॥

શ્રીભગવાનુવાચ ।
વરં વરય વિપ્રર્ષે યત્તે મનસિ વર્તતે ।
ઇત્યુક્તસ્તં પ્રણમ્યેલાપુંસ્ત્વમભ્યર્થયન્મુનિઃ ॥ ૪૦ ॥

અથ પ્રસન્નો ભગવાનુવાચ મુનિસત્તમમ્ ।
માસં પુમાન્ સ ભવિતા માસં નારી ભવિષ્યતિ ॥ ૪૧ ॥

ઇતિ પ્રાપ્ય વરં શમ્ભોર્મહર્ષિર્જગદમ્બિકામ્ ।
વરદાનોન્મુખી દેવીં પ્રણનામ મહેશ્વરીમ્ ॥ ૪૨ ॥

કોટિચન્દ્રકલાકાન્તિં સુસ્મિતાં પરિપૂજ્ય ચ ।
તુષ્ટાવ ભક્ત્યા સતતમિલાયાઃ પુંસ્ત્વકામ્યયા ॥ ૪૩ ॥

જય દેવિ મહાદેવિ ભક્તાનુગ્રહકારિણિ ।
જય સર્વસુરારાધ્યે જયાનન્તગુણાલયે ॥ ૪૪ ॥

નમો નમસ્તે દેવેશિ શરણાગતવત્સલે ।
જય દુર્ગે દુઃખહન્ત્રિ દુષ્ટદૈત્યનિષૂદિનિ ॥ ૪૫ ॥

ભક્તિગમ્યે મહામાયે નમસ્તે જગદમ્બિકે ।
સંસારસાગરોત્તારપોતીભૂતપદામ્બુજે ॥ ૪૬ ॥

બ્રહ્માદયોઽપિ વિબુધાસ્ત્વત્પાદામ્બુજસેવયા ।
વિશ્વસર્ગસ્થિતિલયપ્રભુત્વં સમવાપ્નુયુઃ ॥ ૪૭ ॥

પ્રસન્ના ભવ દેવેશિ ચતુર્વર્ગપ્રદાયિનિ ।
કસ્ત્વાં સ્તોતું ક્ષમો દેવિ કેવલં પ્રણતોઽસ્થહમ્ ॥ ૪૮ ॥

એવં સ્તુતા ભગવતી દુર્ગા નારાયણી પરા ।
ભક્ત્યા વસિષ્ઠમુનિના પ્રસન્ના તત્ક્ષણાદભૂત્ ॥ ૪૯ ॥

તદોવાચ મહાદેવી પ્રણતાર્તિહરી મુનિમ્ ।
સુદ્યુમ્નભવનં ગત્વા કુરુ ભક્ત્યા મદર્ચનમ્ ॥ ૫૦ ॥

સુદ્યુનં શ્રાવય પ્રીત્યા પુરાણ મત્પ્રિયઙ્કરમ્ ।
દેવીભાગવતં નામ નવાહોભિર્દ્વિજોત્તમ ॥ ૫૧ ॥

શ્રવણાદેવ સતતં પુંસ્ત્વમસ્ય ભવિષ્યતિ ।
ઇત્યુક્ત્વા ચ તિરોધાનં ગચ્છતઃ સ્મ શિવેશ્વરૌ ॥ ૫૨॥

વસિષ્ઠસ્તાં દિશં નત્વા સમાગત્યાશ્રમં નિજમ્ ।
સમાહૂય ચ સુદ્યુમ્નં દેવ્યારાધનમાદિશત્ ॥ ૫૩॥

આશ્વિનસ્ય સિતે પક્ષે સમ્પૂજ્ય જગદમ્બિકામ્ ।
નવરાત્રવિધાનેન શ્રાવયામાસ ભૂપતિમ્ ॥ ૫૪॥

શ્રુત્વા ભક્ત્યાપિ સુદ્યુમ્નઃ શ્રીમદ્ભાગવતામૃતમ્ ।
પ્રણમ્યાભ્યર્ચ્ય ચ ગુરું લેભે પુંસ્ત્વં નિરન્તરમ્ ॥ ૫૫॥

રાજ્યાસનેઽભિષિક્તસ્તુ વસિષ્ઠેન મહર્ષિણા ।
ભુવં શશાસ ધર્મેણ પ્રજાશ્ચૈવાનુરઞ્જયન્ ॥ ૫૬॥

ઈજે ચ વિવિધૈર્યજ્ઞૈઃ સમ્પૂર્ણવરદક્ષિણૈઃ ।
પુત્રેષુ રાજ્યં સન્દિશ્ય પ્રાપ દેવ્યાઃ સલોકતામ્ ॥ ૫૭॥

ઇતિ કથિતમશેષં સેતિહાસં ચ વિપ્રા
યદિ પઠતિ સુભક્ત્યા માનવો વા શ ૃણોતિ ।
સ ઇહ સકલકામાન્ પ્રાપ્ય દેવ્યાઃ પ્રસાદાત્
પરમમૃતમથાન્તે યાતિ દેવ્યાઃ સલોકમ્ ॥ ૫૮॥

ઇતિ શ્રીસ્કન્દપુરાણે માનસખણ્ડે શ્રીમદ્દેવીભાગવતમાહાત્મ્યે
દેવીભાગવત-નવાહશ્રવણાદ્ ઇલાયાઃ પુંસ્ત્વપ્રાપ્તિવર્ણનં નામ તૃતીયોઽધ્યાયઃ ॥ ૦.૩॥

## ૦.૪ દેવીભાગવતમાહાત્મ્યમ્ । ચતુર્થોઽધ્યાયઃ । રૈવતનામકમનુપુત્રોત્પત્તિવર્ણનમ્ ।

સૂત ઉવાચ ।
ઇતિ શ્રુત્વા કથાં દિવ્યાં વિચિત્રાં કુમ્ભસમ્ભવઃ ।
શુશ્રૂષુઃ પુનરાહેદં વિશાખં વિનયાન્વિતઃ ॥ ૧॥

અગસ્ત્ય ઉવાચ ।
દેવસેનાપતે દેવ વિચિત્રેયં શ્રુતા કથા ।
પુનરન્યજ્જ માહાત્મ્યં વદ ભાગવતસ્ય મે ॥ ૨॥

સ્કન્દ ઉવાચ ।
મિત્રાવરુણસમ્ભૂત મુને શ ૃણુ કથામિમામ્ ।

યત્રૈકદેશમહિમા પ્રોક્તો ભાગવતસ્ય તુ ॥ ૩॥

વર્ણ્યતે ધર્મવિસ્તારો ગાયત્રીમધિકૃત્ય ચ ।
ગાયત્ર્યા મહિમા યત્ર તદ્ ભાગવતમિષ્યતે ॥ ૪॥

ભગવત્યા ઇદં યસ્માત્તસ્માત્ ભાગવતં વિદુઃ ।
બ્રહ્મવિષ્ણુશિવારાધ્યા પરા ભગવતી હિ સા ॥ ૫॥

ઋતવાગિતિ વિખ્યાતો મુનિરાસીન્મહામતિઃ ।
તસ્યપુત્રોઽભવત્કાલે ગણ્ડાન્તે પૌષ્ણભાન્તિમે ॥ ૬॥

સ તસ્ય જાતકર્માદિક્રિયાશ્ચક્રે યથાવિધિ ।
ચૂડોપનયનાદીંશ્ચ સંસ્કારાનપિ સોઽકરોત્ ॥ ૭॥

યત આરભ્ય જાતોઽસૌ પુત્રસ્તસ્ય મહાત્મનઃ ।
તત એવાથ સ મુનિઃ શોકરોગાકુલોઽભવત્ ॥ ૮॥

રોષલોભપરીતાત્મા તથા માતાપિ તસ્ય ચ ।
બહુરોગાર્દિતા નિત્યં શુચા દુઃખીકૃતા ભૃશમ્ ॥ ૯॥

ઋતવાક્ સ મુનિશ્ચિન્તામવાપ ભૃશદુઃખિતઃ ।
કિમેતત્ કારણં જાતં પુત્રો મેઽત્યન્તદુર્મતિઃ ॥ ૧૦॥

કસ્યચિન્મુનિપુત્રસ્ય બલાત્ પત્નીં જહાર ચ ।
મેને શિક્ષાં પિતુર્નાસૌ ન ચ માતુર્વિમૂઢધીઃ ॥ ૧૧॥

તતો વિષણ્ણચિત્તસ્તુ ઋતવાગબ્રવીદિદમ્ ।
અપુત્રતા વરં નૃણાં ન કદાચિત્ કુપુત્રતા ॥ ૧૨॥

પિતૄન્ કુપુત્રઃ સ્વર્યાતાન્નિરયે પાતયત્યપિ ।
યાવજ્જીવેત્ સદા પિત્રોઃ કેવલં દુઃખદાયકઃ ॥ ૧૩॥

પિત્રોર્દુઃખાય ધિગ્જન્મ કુપુત્રસ્ય ચ પાપિનઃ ।
સુહૃદાં નોપકારાય નાપકારાય વૈરિણામ્ ॥ ૧૪॥

ધન્યાસ્તે માનવા લોકે સુપુત્રો યદ્ગૃહે સ્થિતઃ ।
પરોપકારશીલશ્ચ પિતુર્માતુઃ સુખાવહઃ ॥ ૧૫॥

કુપુત્રેણ કુલં નષ્ટં કુપુત્રેણ હતં યશઃ ।
કુપુત્રેણેહ ચામુત્ર દુઃખં નિરયયાતનાઃ ॥ ૧૬॥

કુપુત્રેણાન્વયો નષ્ટો જન્મ નષ્ટં કુભાર્યયા ।
કુભોજનેન દિવસઃ કુમિત્રેણ સુખં કુતઃ ॥ ૧૭॥

સ્કન્દ ઉવાચ ।
એવં દુષ્ટસ્ય પુત્રસ્ય દુષ્ટૈરાચરણૈર્મુનિ ।
તપ્યમાનોઽનિશં કાલે ગત્વા ગર્ગમપૃચ્છત ॥ ૧૮॥

ઋતવાગુવાચ ।
ભગવંસ્ત્વામહં પ્રષ્ટુમિચ્છામિ વદ તત્ પ્રભો ।
જ્યોતિશ્શાસ્ત્રસ્ય ચાચાર્ય પુત્રદૌઃશીલ્યકારણમ્ ॥ ૧૯॥

ગુરુશુશ્રૂષયા વેદા અધીતા વિધિવન્મયા ।
બ્રહ્મચારિવ્રતં તીર્ત્વા વિવાહો વિધિવત્ કૃતઃ ॥ ૨૦॥

ભાર્યયા સહ ગાર્હસ્થ્યધર્મશ્ચાનુષ્ઠિતોઽનિશમ્ ।
પઞ્ચયજ્ઞવિધાનં ચ મયાકારિ યથાવિધિ ॥ ૨૧॥

નરકાદ્ બિભ્યતા વિપ્ર ન તુ કામસુખેચ્છયા ।
ગર્ભાધાનં ચ વિધિવત્ પુત્રપ્રાપ્ત્યૈ મયા કૃતમ્ ॥ ૨૨॥

પુત્રોઽયં મમ દોષેણ માતુર્દોષેણ વા મુને ।
જાતો દુઃખાવહઃ પિત્રોર્દુઃશીલો બન્ધુશોકદઃ ॥ ૨૩॥

એતન્નિશમ્ય વચનં ગર્ગાચાર્યો મુનેસ્તદા ।
વિચાર્ય સર્વં તદ્ધેતું જ્યોતિર્વિદ્વાચમબ્રવીત્ ॥ ૨૪॥

ગર્ગ ઉવાચ ।
મુને નૈવાપરાધસ્તે ન માતુર્ન કુલસ્ય ચ ।
રેવત્યન્તં તુ ગણ્ડાન્તં પુત્રદૌઃશીલ્યકારણમ્ ॥ ૨૫॥

દુષ્ટે કાલે યતો જન્મ પુત્રસ્ય તવ ભો મુને ।
તેનૈવ તવ દુઃખાય નાન્યો હેતુર્મનાગપિ ॥ ૨૬॥

તદ્દુઃખશાન્તયે બ્રહ્મઞ્જગતાં માતરં શિવામ્ ।
સમારાધય યત્નેન દુર્ગાં દુર્ગતિનાશિનીમ્ ॥ ૨૭॥

ગર્ગસ્ય વચનં શ્રુત્વા ઋતવાક્ ક્રોધમૂર્ચ્છિતઃ ।
રેવતીં તુ શશાપાસૌ વ્યોમ્નઃ પતતુ રેવતી ॥ ૨૮॥

દત્તે શાપે તુ તેનાથ પૂષ્ણો ભઞ્જ પપાત ખાત્ ।

કુમુદાદ્રૌ ભાસમાનં સર્વલોકસ્ય પશ્યતઃ ॥ ૨૯॥

ખ્યાતો રૈવતકશ્ચાભૂત્તત્પાતાત્ કુમુદાચલઃ ।
અતીવ રમણીયશ્ચ તતઃ પ્રભૃતિ સોઽપ્યભૂત્ ॥ ૩૦॥

દત્ત્વા શાપં ચ રેવત્યૈ ગર્ગોક્તવિધિના મુનિઃ ।
સમારાધ્યામ્બિકાં દેવીં સુખસૌભાગ્યભાગભૂત્ ॥ ૩૧॥

સ્કન્દ ઉવાચ ।
રેવત્યૃક્ષસ્ય યત્ તેજસ્તસ્માજ્જાતા તુ કન્યકા ।
રૂપેણાપ્રતિમા લોકે દ્વિતીયા શ્રીરિવાભવત્ ॥ ૩૨॥

અથ તાં પ્રમુચઃ કન્યાં રેવતીકાન્તિસમ્ભવામ્ ।
દૃષ્ટ્વા નામ ચકારાસ્યા રેવતીતિ મુદા મુનિઃ ॥ ૩૩॥

નિન્યેઽથ સ્વાશ્રમે ચૈનાં પોષયામાસ ધર્મતઃ ।
બ્રહ્મર્ષિઃ પ્રમુચો નામ કુમુદાદ્રૌ સુતામિવ ॥ ૩૪॥

અથ કાલેન ચ પ્રૌઢાં દૃષ્ટ્વા તાં રૂપશાલિનીમ્ ।
સ મુનિશ્ચિન્તયામાસ કોઽસ્યા યોગ્યો વરો ભવેત્ ॥ ૩૫॥

બહુધાન્વેષયસ્તસ્યા નાસસાદોચિતં પતિમ્ ।
તતોઽગ્નિશાલાં સંવિશ્ય મુનિસ્તુષ્ટાવ પાવકમ્ ॥ ૩૬॥

કન્યાવરં તદાશંસત્પ્રીતસ્તમપિ હવ્યવાટ્ ।
ધર્મિષ્ઠો બલવાન્ વીરઃ પ્રિયવાગપરાજિતઃ ॥ ૩૭॥

દુર્દમો ભવિતા ભર્તા મુનેઽસ્યાઃ પૃથિવીપતિઃ ।
ઇતિ શ્રુત્વા વચો વહ્નેઃ પ્રસન્નોઽભૂન્મુનિસ્તદા ॥ ૩૮॥

દૈવાદાખેટકવ્યાજાત્ તત્ક્ષણાદાગતો નૃપઃ ।
દુર્દમો નામ મેધાવી તસ્યાશ્રમપદં મુનેઃ ॥ ૩૯॥

પુત્રો વિક્રમશીલસ્ય બલવાન્ વીર્યવત્તરઃ ।
કાલિન્દીજઠરે જાતઃ પ્રિયવ્રતકુલોદ્ભવઃ ॥ ૪૦॥

મુનેરાશ્રમમાવિશ્ય તમદૃષ્ટ્વા મહામુનિમ્ ।
આમન્ત્ર્ય તાં પ્રિયે ચેતિ રેવતીં પૃષ્ટવાન્ નૃપઃ ॥ ૪૧॥

રાજોવાચ ।
મહર્ષિર્ભગવાનસ્માદાશ્રમાત્ ક્વ ગતઃ પ્રિયે ।

તત્પાદૌ દ્રષ્ટુમિચ્છામિ વદ કલ્યાણિ તત્ત્વતઃ ॥ ૪૨॥

કન્યોવાચ ।
અગ્નિશાલામુપગતો મહારાજ મહામુનિઃ ।
નિશ્ચક્રામાશ્રમાત્ તૂર્ણં રાજાપ્યાકર્ણ્ય તદ્વચઃ ॥ ૪૩॥

અથાગ્નિશાલાદ્વારસ્થં રાજાનં દુર્દમં મુનિઃ ।
રાજલક્ષણસંયુક્તમપશ્યત્ પ્રશ્રયાનતમ્ ॥ ૪૪॥

પ્રણનામ ચ તં રાજા મુનિઃ શિષ્યમુવાચ હ ।
ગૌતમાનીયતામર્ઘ્યમર્ઘ્યયોગ્યોઽસ્તિ ભૂપતિઃ ॥ ૪૫॥

આગતશ્ચિરકાલેન જામાતેતિ વિશેષતઃ ।
ઇત્યુક્ત્યાર્ઘ્યં દદૌ તસ્મૈ સોઽપિ જગ્રાહ ચિન્તયન્ ॥ ૪૬॥

મુનિરાસનમાસીનં ગૃહીતાર્ઘ્યં ચ ભૂપતિમ્ ।
આશીર્ભિરભિનન્દ્યાથ કુશલં ચાપ્યપૃચ્છત ॥ ૪૭॥

અપિ ઽનામયં રાજન્ બલે કોશે સુહૃત્સુ ચ ।
ભૃત્યેઽમાત્યે પુરે દેશે તથાત્મનિ જનાધિપ ॥ ૪૮॥

ભાર્યાસ્તિ તે કુશલિની યતઃ સાત્રૈવ તિષ્ઠતિ ।
અતો ન પૃચ્છામ્યસ્યાસ્તે ચાન્યાસાં કુશલં વદ ॥ ૪૯॥

રાજોવાચ ।
ભગવંસ્ત્વત્પ્રસાદેન સર્વત્રાનામયં મમ ।
એતત્ કુતૂહલં બ્રહ્મન્ મદ્ભાર્યા કાત્ર વિદ્યતે ॥ ૫૦॥

ઋષિરુવાચ ।
રેવતી નામ તે ભાર્યા રૂપેણાપ્રતિમા ભુવિ ।
વિદ્યતેઽત્ર કથં પત્નીં તાં ન વેત્સિ મહીપતે ॥ ૫૧॥

રાજોવાચ ।
સુભદ્રાદ્યાસ્તુ યા ભાર્યા મમ સન્તિ ગૃહે વિભો ।
જાનામિ તાસ્તુ ભગવન્ નૈવ જાનામિ રેવતીમ્ ॥ ૫૨॥

ઋષિરુવાચ ।
પ્રિયેતિ સામ્પ્રતં રાજંસ્ત્વયોક્તા યા મહામતે ।
સા વિસ્મૃતા ક્ષણાદેવ યા તે શ્લાઘ્યતમા પ્રિયા ॥ ૫૩॥

રાજોવાચ ।
ત્વયોક્તં યન્મૃષા તનો તથૈવામન્ત્રિતા મયા ।
મુને દુષ્ટો ન મે ભાવઃ કોપં મા કર્તુમર્હસિ ॥ ૫૪॥

ઋષિરુવાચ ।
રાજન્નુક્તં ત્વયા સત્યં ન ભાવો દૂષિતસ્તવ ।
વહ્નિના પ્રેરિતેનેત્થં ભવતા વ્યાહૃતં વચઃ ॥ ૫૫॥

અદ્ય પૃષ્ટો મયા વહ્નિઃ કોઽસ્યા ભર્તા ભવિષ્યતિ ।
તેનોક્તં દુર્દમો રાજા ભવિતાસ્યાઃ પતિર્ધ્રુવમ્ ॥ ૫૬॥

તદાદત્સ્વ મયા દત્તામિમાં કન્યાં મહીપતે ।
પ્રિયેત્યામન્ત્રિતા પૂર્વં મા વિચારં કુરુષ્વ ભોઃ ॥ ૫૭॥

શ્રુત્વૈતત્સોઽભવત્તૂષ્ણીં ચિન્તયન્ મુનિભાષિતમ્ ।
વૈવાહિકં વિધિં તસ્ય મુનિઃ કર્તું સમુદ્યતઃ ॥ ૫૮॥

અથોદ્યતં વિવાહાય દૃષ્ટ્વા કન્યાબ્રવીન્મુનિમ્ ।
રેવત્યૃક્ષે વિવાહો મે તાત કર્તું ત્વમર્હસિ ॥ ૫૯॥

ઋષિરુવાચ ।
વત્સે વિવાહયોગ્યાનિ સન્ત્યન્યર્ક્ષાણિ ભૂરિશઃ ।
રેવત્યાં કથમુદ્વાહઃ પૌષ્ણભં ન દિવિ સ્થિતમ્ ॥ ૬૦॥

કન્યોવાચ ।
રેવત્યૃક્ષં વિના કાલો મમોદ્વાહોચિતો ન હિ ।
અતઃ સમ્પ્રાર્થયામ્યેતદ્વિવાહં પૌષ્ણભે કુરુ ॥ ૬૧॥

ઋષિરુવાચ ।
ઋતવાઙ્મુનિના પૂર્વં રેવતીભં નિપાતિતમ્ ।
ભાન્તરે ચેન્ન તે પ્રીતિર્વિવાહઃ સ્યાત્ કથં તવ ॥ ૬૨॥

કન્યોવાચ ।
તપઃ કિં તપ્તવાનેક ઋતવાગેવ કેવલમ્ ।
ભવતા કિં તપો નેદૃક્ તપ્તં વાક્કાયમાનસૈઃ ॥ ૬૩॥

જગત્સ્રષ્ટું સમર્થસ્ત્વં વેદ્મ્યહં તે તપોબલમ્ ।
રેવત્યૃક્ષં દિવિ સ્થાપ્ય મમોદ્વાહં પિતઃ કુરુ ॥ ૬૪॥

ઋષિરુવાચ ।
એવં ભવતુ ભદ્રં તે યથૈવ ત્વં બ્રવીષિ મામ્ ।
ત્વત્કૃતે સોમમાર્ગેઽહં સ્થાપયામ્યદ્ય પૌષ્ણભમ્ ॥ ૬૫॥

સ્કન્દ ઉવાચ ।
એવમુક્ત્વા મુનિસ્તૂર્ણં પૌષ્ણભં સ્વતપોબલાત્ ।
યથાપૂર્વં તથા ચક્રે સોમમાર્ગે ઘટોદ્ભવ ॥ ૬૬॥

રેવતીનામ્નિ નક્ષત્રે વિવાહવિધિના મુનિઃ ।
રેવતીં પ્રદદૌ રાજ્ઞે દુર્દમાય મહાત્મને ॥ ૬૭॥

કૃત્વા વિવાહં કન્યાયા મુની રાજાનમબ્રવીત્ ।
કિં ઽભિલષિતં વીર વદ તત્પૂરયામ્યહમ્ ॥ ૬૮॥

રાજોવાચ ।
મનોઃ સ્વાયમ્ભુવસ્યાહં વંશે જાતોઽસ્મિ હે મુને ।
મન્વન્તરાધિપં પુત્રં ત્વત્પ્રસાદાચ્ચ કામયે ॥ ૬૯॥

મુનિરુવાચ ।
યદ્યેષા કામના તેઽસ્તિ દેવ્યા આરાધનં કુરુ ।
ભવિષ્યત્યેવ તે પુત્રો મનુર્મન્વન્તરાધિપઃ ॥ ૭૦॥

દેવીભાગવતં નામ પુરાણં યત્તુ પઞ્ચમમ્ ।
પઞ્ચકૃત્વસ્તુ તચ્છ્રુત્વા લપ્સ્યસેઽભિમતં સુતમ્ ॥ ૭૧॥

રેવત્યાં રૈવતો નામ પઞ્ચમો ભવિતા મનુઃ ।
વેદવિચ્છાસ્ત્રતત્ત્વજ્ઞો ધર્મવાનપરાજિતઃ ॥ ૭૨॥

ઇત્યુક્તો મુનિના રાજા પ્રણમ્ય મુદિતો મુનિમ્ ।
ભાર્યયા સહ મેધાવી જગામ નગરં નિજમ્ ॥ ૭૩॥

પિતૃપૈતામહં રાજ્યં ચકાર સ મહામતિઃ ।
પાલયામાસ ધર્માત્મા પ્રજાઃ પુત્રાનિવૌરસાન્ ॥ ૭૪॥

એકદા લોમશો નામ મહાત્મા મુનિરાગતઃ ।
પ્રણિપત્ય તમભ્યર્ચ્ય પ્રાઞ્જલિશ્ચાબ્રવીન્નૃપઃ ॥ ૭૫॥

રાજોવાચ ।
ભગવંસ્ત્વત્પ્રસાદેન શ્રોતુમિચ્છામિ ભો મુને ।

દેવીભાગવતં નામ પુરાણં પુત્રલિપ્સયા ॥ ૭૬॥

શ્રુત્વા વાચં પ્રજાભર્તુઃ પ્રીતઃ પ્રોવાચ લોમશઃ ।
ધન્યોઽસિ રાજંસ્તે ભક્તિર્જાતા ત્રૈલોક્યમાતરિ ॥ ૭૭॥

સુરાસુરનરારાધ્યા યા પરા જગદમ્બિકા ।
તસ્યાં ચેદ્ભક્તિરુત્પન્ના કાર્યસિદ્ધિર્ભવિષ્યતિ ॥ ૭૮॥

અતસ્ત્વાં શ્રાવયિષ્યામિ શ્રીમદ્ભાગવતં નૃપ ।
યસ્ય શ્રવણમાત્રેણ ન કિઞ્ચિદપિ દુર્લભમ્ ॥ ૭૯॥

ઇત્યુક્ત્વા સુદિને બ્રહ્મન્ કથારમ્ભમથાકરોત્ ।
પઞ્ચકૃત્વઃ સ શુશ્રાવ વિધિવદ્ભાર્યયા સહ ॥ ૮૦॥

સમાપ્તિદિવસે રાજા પુરાણઞ્ચ મુનિં તથા ।
પૂજયામાસ ધર્માત્મા મુદા પરમયા યુતઃ ॥ ૮૧॥

હુત્વા નવાર્ણમન્ત્રેણ ભોજયિત્વા કુમારિકાઃ ।
વાડવાંશ્ચ સપત્નીકાન્દક્ષિણાભિરતોષયત્ ॥ ૮૨॥

અથ કાલેન કિયતા ભગવત્યાઃ પ્રસાદતઃ ।
ગર્ભં દધાર સા રાજ્ઞી લોકકલ્યાણકારકમ્ ॥ ૮૩
પુણ્યેઽથ સમયે પ્રાપ્તે ગ્રહૈઃ સુસ્થાનસઙ્ગતૈઃ ।
સર્વમઙ્ગલસમ્પન્ને રેવતી સુષુવે સુતમ્ ॥ ૮૪
શ્રુત્વા પુત્રસ્ય જનનં સ્નાત્વા રાજા મુદાન્વિતઃ ।
સ સુવર્ણામ્ભસા ચક્રે જાતકર્માદિકાઃ ક્રિયાઃ ॥ ૮૫
યથાવિધિ ચ દાનાનિ દત્ત્વા વિપ્રાનતોષયત્ ।
કૃતોપનયનં રાજા સાઙ્ગાન્વેદાનપાઠયત્ ॥ ૮૬॥

સર્વવિદ્યાનિધિર્જાતો ધર્મિષ્ઠોઽસ્ત્રવિદાં વરઃ ।
ધર્મસ્ય વક્તા કર્તા ચ રૈવતો નામ વીર્યવાન્ ॥ ૮૭॥

નિયુક્તવાનથ બ્રહ્મા રૈવતં માનવે પદે ।
મન્વન્તરાધિપઃ શ્રીમાન્ ગાં શશાસ સ ધર્મતઃ ॥ ૮૮॥

ઇત્થં દેવ્યાઃ પ્રભાવોઽયં સઙ્ક્ષેપેણોપવર્ણિતઃ ।
પુરાણસ્ય ચ માહાત્મ્યં કો વક્તું વિસ્તરાત્ક્ષમઃ ॥ ૮૯॥

સૂત ઉવાચ ।

કુમ્ભયોનિસ્તુ માહાત્મ્યં વિધિં ભાગવતસ્ય ચ ।
શ્રુત્વા કુમારં ચાભ્યર્ચ્ય સ્વાશ્રમં પુનરાયયૌ ॥ ૯૦॥

ઇદં મયા ભાગવતસ્ય વિપ્રા
માહામ્યમુક્તં ભવતાં સમક્ષમ્ ।
શ઼ૃણોતિ ભક્ત્યા પઠતીહ ભોગાન્
ભુક્ત્યાખિલાન્મુક્તિમુપૈતિ ચાન્તે ॥ ૯૧॥

ઇતિ શ્રીસ્કન્દપુરાણે માનસખણ્ડે શ્રીમદ્દેવીભાગવતમાહાત્મ્યે
રૈવતનામકમનુપુત્રોત્પત્તિવર્ણનં નામ ચતુર્થોઽધ્યાયઃ ॥ ૦.૪॥

## ૦.૫ દેવીભાગવતમાહાત્મ્યમ્ । પઞ્ચમોઽધ્યાયઃ । દેવીભાગવત-શ્રવણવિધિવર્ણનમ્ ।

ઋષય ઊચુઃ ।
સૂત સૂત મહાભાગ શ્રુતં માહાત્મ્યમુત્તમમ્ ।
અધુના શ્રોતુમિચ્છામઃ પુરાણશ્રવણે વિધિમ્ ॥ ૧॥

સૂત ઉવાચ ।
શ્રૂયતાં મુનયઃ સર્વે પુરાણશ્રવણે વિધિમ્ ।
નરાણાં શ઼ૃણ્વતાં યેન સિદ્ધિઃ સ્યાત્સાર્વકામિકી ॥ ૨॥

આદૌ દૈવજ્ઞમાહૂય મુહૂર્તં કલ્પયેત્સુધીઃ ।
આરભ્ય શુચિમાસ તુ માસષટ્કં શુભાવહમ્ ॥ ૩॥

હસ્તાશ્વિમૂલપુષ્યર્ક્ષે બ્રહ્મમૈત્રેન્દુવૈષ્ણવે ।
સત્તિથૌ શુભવારે ચ પુરાણશ્રવણં શુભમ્ ॥ ૪॥

ગુરુભાદ્વેદવેદાબ્જશરાઙ્ગાબ્ધિગુણૈઃ ક્રમાત્ ।
ધર્માપ્તિરિન્દિરાપ્રાપ્તિઃ કથાસિદ્ધિઃ પરં સુખમ્ ॥ ૫
પીડાથ ભૂપતિભયં જ્ઞાનપ્રાપ્તિઃ ક્રમાત્ફલમ્ ।
પુરાણશ્રવણે ચક્રં શોધયેચ્છિવભાષિતમ્ ॥ ૬
અથવા પ્રીતયે દેવ્યા નવરાત્રચતુષ્ટયે ।
શ઼ૃણુયાદન્યમાસેઽપિ તિથિવારર્ક્ષશોધિતે ॥ ૭
સમ્ભારં તાદૃશં કાર્યં વિવાહાદૌ ચ યાદૃશમ્ ।
નવાહયજ્ઞે ચાપ્યસ્મિન્વિધેયં યત્નતો બુધૈઃ ॥ ૮
સહાયા બહવઃ કાર્યા દમ્ભલોભવિવર્જિતાઃ ।

ચતુરાશ્ચ વદાન્યાશ્ચ દેવીભક્તિપરા નરાઃ ॥ ૯
પ્રેષ્યા યત્નેન વાર્તેયં દેશે દેશે જને જને ।
આગન્તવ્યમિહાવશ્યં કથા દેવ્યા ભવિષ્યતિ ॥ ૧૦
સૌરાશ્ચ ગાણપત્યાશ્ચ શૈવાઃ શાક્તાશ્ચ વૈષ્ણવાઃ ।
સર્વેષામપિ સેવ્યેયં યતો દેવાઃ સશક્તયઃ ॥ ૧૧
શ્રીમદ્દેવીભાગવતપીયૂષરસલોલુપૈઃ ।
આગન્તવ્યં વિશેષેણ કથાર્થં પ્રેમતત્પરૈઃ ॥ ૧૨
બ્રાહ્મણાદ્યાશ્ચ યે વર્ણાઃ સ્ત્રિયશ્ચાશ્રમિણસ્તથા ।
સકામાશ્ચાપિ નિષ્કામાઃ પાતવ્યં તૈઃ કથામૃતમ્ ॥ ૧૩
નાવકાશઃ કદાચિત્સ્યાન્નવાહશ્રવણેઽપિ તૈઃ ।
આગન્તવ્યં યથાકાલં યજ્ઞે પુણ્યા ક્ષણસ્થિતિઃ ॥ ૧૪॥

વિનયેનૈવ કર્તવ્યમેવમાકારણં નૃણામ્ ।
આગતાનાઞ્ચ કર્તવ્યં વાસસ્થાનં યથોચિતમ્ ॥ ૧૫॥

કથાસ્થાનં પ્રકર્તવ્યં ભૂમૌ માર્જનપૂર્વકમ્ ।
લેપનં ગોમયેનાથ વિશાલાયાં મનોરમમ્ ॥ ૧૬॥

કાર્યસ્તુ મણ્ડપો રમ્યો રમ્ભાસ્તમ્ભોપશોભિતઃ ।
વિતાનમુપરિષ્ટાત્તુ પતાકાધ્વજરાજિતઃ ॥ ૧૭॥

વક્તુશ્ચૈવાસનં દિવ્યં સુખાસ્તરણસંયુતમ્ ।
રચિતવ્યં પ્રયત્નેન પ્રાઙ્મુખં વાપ્યુદઙ્મુખમ્ ॥ ૧૮॥

યથોચિતાનિ કુર્વીત શ્રોતૃણામાસનાનિ ચ ।
નૃણાં ચૈવાથ નારીણાં કથાશ્રવણહેતવે ॥ ૧૯॥

વાગ્મી દાન્તશ્ચ શાસ્ત્રજ્ઞો દેવ્યારાધનતત્પરઃ ।
દયાલુર્નિસ્પૃહો દક્ષો ધીરો વક્તોત્તમો મતઃ ॥ ૨૦॥

બ્રહ્મણ્યો દેવતાભક્તઃ કથારસપરાયણઃ ।
ઉદારોઽલોલુપો નમ્રઃ શ્રોતા હિંસાદિવર્જિતઃ ॥ ૨૧॥

પાખણ્ડનિરતો લુબ્ધઃ સ્ત્રૈણો ધર્મધ્વજસ્તથા ।
નિષ્ઠુરઃ ક્રોધનો વક્તા દેવીયજ્ઞે ન શસ્યતે ॥ ૨૨॥

સંશયચ્છેદનાયૈકઃ પણ્ડિતશ્ચ તથાગુણઃ ।
શ્રોતૃબોધકૃદવ્યગ્રઃ કાર્યો વક્તુઃ સહાયકૃત્ ॥ ૨૩॥

મુહૂર્તદિવસાદર્વાગ્વક્તૃશ્રોત્રાદિભિર્જનૈઃ ।
કર્તવ્યં ક્ષૌરકર્માદિ તતો નિયમકલ્પનમ્ ॥ ૨૪॥

અરુણોદયવેલાયાં સ્નાયાચ્છૌચં વિધાય ચ ।
સસ્થાતર્પણકાર્યઞ્ચ નિત્યં સઙ્ક્ષેપતશ્ચરેત્ ॥ ૨૫॥

કથાશ્રવણયોગ્યત્વસિદ્ધ્યે ગાશ્ચ દાપયેત્ ।
સમસ્તવિઘ્નહર્તારમાદૌ ગણપતિં યજેત્ ॥ ૨૬॥

કલશાંશ્ચાપિ સંસ્થાપ્ય પૂજયેત્તત્ર દિગ્ભવાન્ ।
વટુકં ક્ષેત્રપાલઞ્ચ યોગિનીર્માતૃકાસ્તથા ॥ ૨૭॥

તુલસીઞ્ચાપિ સમ્પૂજ્ય ગ્રહાન્વિષ્ણઞ્ચ શઙ્કરમ્ ।
નવાક્ષરેણ મનુના પૂજયેજ્જગદમ્બિકામ્ ॥ ૨૮॥

સર્વોપચારૈઃ સમ્પૂજ્ય શ્રીભાગવતપુસ્તકમ્ ।
શ્રીદેવ્યા વાઙ્મયી મૂર્તિ યથાવચ્છોભનાક્ષરમ્ ॥ ૨૯॥

કથાવિઘ્નોપશાન્ત્યર્થં વૃણુયાત્પઞ્ચ વાડવાન્ ।
જાપ્યો નવાર્ણમન્ત્રસ્તૈઃ પાઠ્યઃ સપ્તશતીસ્તવઃ ॥ ૩૦॥

પ્રદક્ષિણનમસ્કારાન્કૃત્વાન્તે સ્તુતિમાચરેત્ ।
કાત્યાયનિ મહામાયે ભવાનિ ભુવનેશ્વરિ ॥ ૩૧॥

સંસારસાગરે મગ્નં મામુદ્ધર કૃપામયે ।
બ્રહ્મવિષ્ણુશિવારાધ્યે પ્રસીદ જગદમ્બિકે ॥ ૩૨॥

મનોઽભિલષિતં દેવિ વરં દેહિ નમોઽસ્તુ તે ।
ઇતિ સમ્પ્રાર્થ્ય શ ૃણુયાત્કથાં નિયતમાનસઃ ॥ ૩૩॥

વક્તારઞ્ચાપિ સમ્પૂજ્ય વ્યાસબુધ્યા યતાત્મવાન્ ।
માલ્યાલઙ્કારવસ્ત્રાદ્યૈઃ સમ્ભૂષ્ય પ્રાર્થયેચ્ચ તમ્ ॥ ૩૪॥

સર્વશાસ્ત્રેતિહાસજ્ઞ વ્યાસરૂપ નમોઽસ્તુ તે ।
કથાચન્દ્રોદયેનાન્તસ્તમઃસ્તોમં નિરાકુરુ ॥ ૩૫॥

તદગ્રે તુ નવાહાન્તં કર્તવ્યા નિયમાસ્તદા ।
વિપ્રાદીનુપવેશ્યાદૌ સમ્પૂજ્યોપવિશેત્સ્વયમ્ ॥ ૩૬॥

શ્રોતવ્યં સાવધાનેન ચતુર્વર્ગફલાપ્તયે ।
ગૃહપુત્રકલત્રાપ્તધનચિન્તામપાસ્ય ચ ॥ ૩૭॥

સૂર્યોદયં સમારભ્ય કિઞ્ચિત્સૂર્યેઽવશેષિતે ।
મુહૂર્તમાત્રં વિશ્રમ્ય મધ્યાહ્ને વાચયેત્સુધીઃ ॥ ૩૮॥

મલમૂત્રજયાયૈષાં લઘુ ભોજનમિષ્યતે ।
હવિષ્યાન્નં વરં ભોજ્યં સકૃદેવ કથાર્થિના ॥ ૩૯॥

અથવા સ્યાત્ફલાહારી પયોભુગ્વા ધૃતાશનઃ ।
યથા સ્યાન્ન કથાવિઘ્નસ્તથા કાર્યં વિચક્ષણૈઃ ॥ ૪૦॥

કથાશ્રવણનિષ્ઠાનાં વક્ષ્યામિ નિયમં દ્વિજાઃ ।
બ્રહ્મવિષ્ણુમહેશાનાં મધ્યે યે ભેદદર્શિનઃ ॥ ૪૧॥

દેવીભક્તિવિહીના યે પાખણ્ડા હિંસકાઃ ખલાઃ ।
વિપ્રદ્રુહો નાસ્તિકા યે ન તે યોગ્યાઃ કથાશ્રવે ॥ ૪૨॥

બ્રહ્મસ્વહરણે લુબ્ધાઃ પરદારધનેષુ ચ ।
દેવસ્વહરણે તેષાં નાધિકારઃ કથાશ્રવે ॥ ૪૩॥

બ્રહ્મચારી ચ ભૂશાયી સત્યવક્તા જિતેન્દ્રિયઃ ।
કથાસમાપ્તૌ ભુઞ્જીત પત્રાવલ્યાં યતાત્મવાન્ ॥ ૪૪॥

વૃન્તાકઞ્ચ કલિન્દઞ્ચ તૈલઞ્ચ દ્વિદલં મધુ ।
દગ્ધમન્નં પર્યુષિતં ભાવદુષ્ટં ત્યજેદ્ વ્રતી ॥ ૪૫॥

આમિષઞ્ચ મસૂરાન્નમુદક્યાદૃષ્ટમેવ ચ ।
રસોનં મૂલકં હિઙ્ગું પલાણ્ડું ગૃઞ્જનં તથા ॥ ૪૬॥

કૂષ્માણ્ડં નલિકાશાકં ન ભુઞ્જીત કથાવ્રતી ।
કામં ક્રોધં મદં લોભં દમ્ભ માનઞ્ચ વર્જયેત્ ॥ ૪૭॥

વિપ્રધ્રુક્પતિતવ્રાત્યશ્વપાકયવનાન્ત્યજૈઃ ।
ઉદક્યયા વેદબાહ્યૈર્ન વદેદ્ધઃ કથાવ્રતી ॥ ૪૮॥

વેદગોગુરુવિપ્રાણાં સ્ત્રીરાજ્ઞાં મહતાં તથા ।
દેવાનાં દેવભક્તાનાં ન નિન્દાં શ઼ૃણુયાદપિ ॥ ૪૯॥

વિનયં ચાર્જવં શૌચં દયાં ચ મિતભાષણમ્ ।
ઉદારં માનસઞ્ચૈવ કુર્યાદ્યસ્તુ કથાવતી ॥ ૫૦॥

શ્વિત્રી કુષ્ઠી ક્ષયી રુગ્ણો ભાગ્યહીનશ્ચ પાપકૃત્ ।

દરિદ્રશ્ચાનપત્યશ્ચ ભક્ત્યેમાં શ઼ૃણયાત્કથામ્ ॥ ૫૧॥

વન્ધ્યા વા કાકવન્ધ્યા વા દુર્ભગા વા મૃતાર્ભકા ।
પતદ્ગર્ભાઙ્ગના યા ચ તાભિઃ શ્રાવ્યા તથા કથા ॥ ૫૨॥

ધર્માર્થકામમોક્ષાંશ્ચ યો વાઞ્છતિ વિના શ્રમમ્ ।
ભગવત્યા ભાગવતં શ્રોતવ્યં તેન યત્નતઃ ॥ ૫૩॥

કથાદિનાનિ ચૈતાનિ નવયજ્ઞૈઃ સમાનિ હિ ।
તેષુ દત્તં હુતં જપ્તમનન્તફલદં ભવેત્ ॥ ૫૪॥

એવં વ્રતં નવાહં તુ કૃત્વોદ્યાપનમાચરેત્ ।
મહાષ્ટમીવ્રતં યદ્વત્તથા કાર્યં ફલેપ્સુભિઃ ॥ ૫૫॥

નિષ્કામાઃ શ્રવણેનૈવ પૂતા મુક્તિં વ્રજન્તિ હિ ।
ભોગમોક્ષપ્રદા નૃણાં યતો ભગવતી પરા ॥ ૫૬॥

પુસ્તકસ્ય ચ વક્તુશ્ચ પૂજા કાર્યા તુ નિત્યશઃ ।
વક્ત્રા દત્તં પ્રસાદં તુ ગૃહ્ણીયાદ્ભક્તિપૂર્વકમ્ ॥ ૫૭॥

કુમારીઃ પૂજયેન્નિત્યં ભોજયેત્પાર્થયેચ્ચ યઃ ।
સુવાસિનીશ્ચ વિપ્રાંશ્ચ તસ્ય સિદ્ધિર્ન સંશયઃ ॥ ૫૮॥

ગાયત્ર્યા નામ સાહસ્રં સમાપ્તાવથ વા પઠેત્ ।
વિષ્ણોર્નામસહસ્રઞ્ચ સર્વદોષોપશાન્તયે ॥ ૫૯॥

યસ્ય સ્મૃત્યા ચ નામોક્ત્યા તપોયજ્ઞક્રિયાદિષુ ।
ન્યૂનં સમ્પૂર્ણતાં યાતિ તસ્માદ્વિષ્ણુઞ્ચ કીર્તયેત્ ॥ ૬૦॥

દેવ્યાઃ સપ્તશતીમન્ત્રૈઃ સમાપ્તૌ હોમમાચરેત્ ।
દેવીમાહાત્મ્યમૂલેન નવાર્ણમનુનાથવા ॥ ૬૧॥

ગાયત્ર્યા ત્વથવા હોમઃ પાયસેન સસર્પિષા ।
યતો ભાગવતં ત્વેતદ્ ગાયત્રીમયમીરિતમ્ ॥ ૬૨॥

વાચકં તોષયેત્સમ્યગ્વસ્ત્રભૂષાધનાદિભિઃ ।
પ્રસન્ને વાચકે સર્વાઃ પ્રસન્નાસ્તસ્ય દેવતાઃ ॥ ૬૩॥

બ્રાહ્મણાન્ભોજયેદ્ભક્ત્યા દક્ષિણાભિશ્ચ તોષયેત્ ।
પૃથિવ્યાં દેવરૂપાસ્તે તુષ્ટેષ્વેષ્વીપ્સિતં ફલમ્ ॥ ૬૪॥

સુવાસિનીઃ કુમારીશ્ચ દેવીભક્ત્યા ચ ભોજયેત્ ।
તાભ્યોઽપિ દક્ષિણાં દત્ત્વા પ્રાર્થયેત્સિદ્ધિમાત્મનઃ ॥ ૬૫॥

દદ્યાદ્દાનાનિ ચાન્યાનિ સુવર્ણં ગાઃ પયસ્વિનીઃ ।
હયાનિભાન્મેદિનીઞ્ચ તસ્ય સ્યાદક્ષયં ફલમ્ ॥ ૬૬॥

દેવીભાગવતં ચૈતલ્લિખિતં શોભનાક્ષરમ્ ।
હેમસિંહાસને સ્થાપ્ય પટ્ટવસ્ત્રેણ વેષ્ટિતમ્ ॥ ૬૭॥

અષ્ટમ્યાં વા નવમ્યાઞ્ચ વાચકાયાર્ચિતાય ચ ।
દદ્યાત્સ ભોગાન્ભુક્ત્વેહ દુર્લભં મોક્ષમાપ્નુયાત્ ॥ ૬૮॥

દરિદ્રો દુર્બલો બાલસ્તરુણો જરઠોઽપિ વા ।
પુરાણવેત્તા વન્દ્યઃ સ્યાત્પૂજ્યો માન્યશ્ચ સર્વદા ॥ ૬૯॥

સન્તિ લોકસ્ય બહવો ગુરવો ગુણજન્મતઃ ।
સર્વેષામપિ તેષાઞ્ચ પુરાણજ્ઞઃ પરો ગુરુઃ ॥ ૭૦॥

પૌરાણિકો બ્રાહ્મણસ્તુ વ્યાસાસનસમાશ્રિતઃ ।
આસમાપ્તે પ્રસઙ્ગે તુ નમસ્કુર્યાન્ન કસ્યચિત્ ॥ ૭૧॥

પૌરાણિકીં કથાં દિવ્યાં યેઽપિ શ ृણ્વન્ત્યભક્તિતઃ ।
તેષાં પુણ્યફલં નાસ્તિ દુઃખદારિદ્ર્યભાગિનામ્ ॥ ૭૨॥

અસમ્પૂજ્ય પુરાણં તુ તામ્બૂલકુસુમાદિભિઃ ।
યે શ ृણ્વન્તિ કથાં દેવ્યાસ્તે દરિદ્રા ભવન્તિહિ ॥ ૭૩॥

કીર્ત્યમાનાં કથાં ત્યક્ત્વા યે વ્રજન્ત્યન્યતો નરાઃ ।
ભોગાન્તરે પ્રણશ્યન્તિ તેષાં દારાશ્ચ સમ્પદઃ ॥ ૭૪॥

યે ચ તુઙ્ગાસનારૂઢાઃ કથાં શ ृણ્વન્તિ દામ્ભિકાઃ ।
તે વાયસા ભવન્ત્યત્ર ભુક્ત્વા નિરયયાતનામ્ ॥ ૭૫॥

યે ચાઢ્યાસનસંસ્થાશ્ચ યે વીરાસનસંસ્થિતાઃ ।
શ ृણ્વન્તિ ચ કથાં દિવ્યાં તે સ્યુરર્જુનશાખિનઃ ॥ ૭૬॥

કથાયાં કીર્ત્યમાનાયાં યે વદન્તિ દુરુત્તરમ્ ।
રાસભાસ્તે ભવન્તીહ કૃકલાસાસ્તતઃ પરમ્ ॥ ૭૭॥

નિન્દન્તિ યે પુરાણજ્ઞાન્ કથાં વા પાપહારિણીમ્ ।
તે તુ જન્મશતં દુષ્ટાઃ શુનકાઃ સ્યુર્ન સંશયઃ ॥ ૭૮॥

યે શ્ૃણ્વન્તિ કથાં વક્તુઃ સમાનાસનસંસ્થિતાઃ ।
ગુરુતલ્પસમં પાપં લભન્તે નરકાલયાઃ ॥ ૭૯॥

યે ચાપ્રણમ્ય શ્ૃણ્વન્તિ તે ભવન્તિ વિષદ્રુમાઃ ।
શયાના યેઽપિ શ્ૃણ્વન્તિ ભવન્ત્યજગરાહ્યઃ ॥ ૮૦॥

યે કદાચન પૌરાણીં ન શ્ૃણ્વન્તિ કથાં નરાઃ ।
તે ઘોરં નરકં ભુક્ત્યા ભવન્તિ વનસૂકરાઃ ॥ ૮૧॥

યે કથાં નાનુમોદન્તે વિઘ્નં કુર્વન્તિ યે શઠાઃ ।
કોટ્યબ્દં નિરયં ભુક્ત્વા ભવન્તિ ગ્રામસૂકરાઃ ॥ ૮૨॥

આસનં ભાજનં દ્રવ્યં ફલં વસ્વાણિ કમ્બલમ્ ।
પુરાણજ્ઞાય યચ્છન્તિ તે વ્રજન્તિ હરેઃ પદમ્ ॥ ૮૩॥

પુરાણપુસ્તકસ્યાપિ યે પટ્ટવસનં નવમ્ ।
પ્રયચ્છન્તિ શુભં સૂત્રં તે નરાઃ સુખભાગિનઃ ॥ ૮૪॥

પુરાણાનાં તુ સર્વેષાં શ્રવણાદ્યત્ફલં લભેત્ ।
તસ્માચ્છતગુણં પુણ્યં દેવીભાગવતાલ્લભેત્ ॥ ૮૫॥

યથા સરિત્સુ પ્રવરા ગઙ્ગા દેવેષુ શઙ્કરઃ ।
કાવ્યે રામાયણં યદ્વજ્જ્યોતિષ્મત્સુ યથા રવિઃ ॥ ૮૬॥

આહ્લાદકાનાં ચન્દ્રશ્ચ ધનાનાઞ્ચ યથા યશઃ ।
ક્ષમાવતાં યથા ભૂમિર્ગામ્ભીર્યે સાગરો યથા ॥ ૮૭॥

મન્ત્રાણાં ચૈવ સાવિત્રી પાપનાશે હરિસ્મૃતિઃ ।
અષ્ટાદશપુરાણાનાં દેવીભાગવતં તથા ॥ ૮૮॥

યેન કેનાપ્યુપાયેન નવકૃત્વ શ્ૃણોતિ ચેત્ ।
ન શક્યં તત્ફલં વક્તું જીવન્મુક્તઃ સ એવ હિ ॥ ૮૯॥

રાજશત્રુભયે પ્રાપ્તે મહામારીભયે તથા ।
દુર્ભિક્ષે રાષ્ટ્રભઙ્ગે ચ તચ્છાન્ત્યૈ શ્ૃણયાદિદમ્ ॥ ૯૦॥

ભૂતપ્રેતવિનાશાય રાજ્યલાભાય શત્રુતઃ ।
પુત્રલાભાય શ્ૃણુયાદ્દેવીભાગવતં દ્વિજાઃ ॥ ૯૧॥

શ્રીમદ્ભાગવતં યસ્તુ પઠેદ્વા શ્ૃણુયાદપિ ।

શ્લોકાર્ધં શ્લોકપાદં વા સ યાતિ પરમાં ગતિમ્ ॥ ૯૨॥

ભગવત્યા સ્વયં દેવ્યા શ્લોકાર્ધેન પ્રકાશિતમ્ ।
શિષ્યપ્રશિષ્યદ્વારેણ તદેવ વિપુલીકૃતમ્ ॥ ૯૩॥

ન ગાયત્ર્યા પરો ધર્મો ન ગાયત્ર્યાઃ પરં તપઃ ।
ન ગાયત્ર્યા સમો દેવો ન ગાયત્ર્યાઃ પરો મનુઃ ॥ ૯૪॥

ગાતારં ત્રાયતે યસ્માદ્ ગાયત્રી તેન સોચ્યતે ।
સાત્ર ભાગવતે દેવી સરહસ્યા પ્રતિષ્ઠિતા ॥ ૯૫॥

અતો ભાગવતસ્યાસ્ય દેવ્યાઃ પ્રીતિકરસ્ય ચ ।
મહાન્ત્યપિ પુરાણાનિ કલાં નાર્હન્તિ ષોડશીમ્ ॥ ૯૬॥

શ્રીમદ્ભાગવતં પુરાણમમલં યદ્બ્રાહ્મણાનાં ધનં
ધર્મો ધર્મસુતેન યત્ર ગદિતો નારાયણેનામલઃ ।
ગાયત્ર્યાશ્ચ રહસ્યમત્ર ચ મણિદ્વીપશ્ચ સંવર્ણિતઃ
શ્રીદેવ્યા હિમભૂભૃતે ભગવતી ગીતા ચ ગીતા સ્વયમ્ ॥ ૯૭॥

તસ્માન્નાસ્ય પુરાણસ્ય લોકેઽન્યત્સદૃશં પરમ્ ।
અતઃ સદૈવ સંસેવ્યં દેવીભાગવતં દ્વિજાઃ ॥ ૯૮॥

યસ્યાઃ પ્રભાવમખિલં ન હિ વેદ ધાતા
નો વા હરિર્ન ગિરિશો ન હિ ચાપ્યનન્તઃ ।
અંશાંશકા અપિ ચ તે કિમુતાન્યદેવા-
સ્તસ્યૈ નમોઽસ્તુ સતતં જગદમ્બિકાયૈ ॥ ૯૯॥

યત્પાદપઙ્કજરજઃ સમવાપ્ય વિશ્વં
બ્રહ્મા સૃજત્યનુદિનઞ્ચ બિભર્તિ વિષ્ણુઃ ।
રુદ્રશ્ચ સંહરતિ નેતરથા સમર્થા-
સ્તસ્યૈ નમોઽસ્તુ સતતં જગદમ્બિકાયૈ ॥ ૧૦૦॥

સુધાકૂપારાન્તસ્ત્રિદશતરુવાટીવિલસિતે
મણિદ્વીપે ચિન્તામણિમયગૃહે ચિત્રરુચિરે ।
વિરાજન્તીમમ્બાં પરશિવહૃદિ સ્મેરવદનાં
નરો ધ્યાત્વા ભોગં ભજતિ ખલુ મોક્ષઞ્ચ લભતે ॥ ૧૦૧॥

બ્રહ્મેશાચ્યુતશક્રાદ્યૈર્મહર્ષિભિરુપાસિતા ।
જગતાં શ્રેયસે સાસ્તુ મણિદ્વીપાધિદેવતા ॥ ૧૦૨॥

ઇતિ શ્રીસ્કન્દપુરાણે માનસખણ્ડે શ્રીમદ્દેવીભાગવતમાહાત્મ્યે
દેવીભાગવત-શ્રવણવિધિવર્ણનં નામ પઞ્ચમોઽધ્યાયઃ ॥ ૦.૫॥

॥ સમાપ્તમિદં શ્રીમદ્દેવીભાગવતમાહાત્મ્યમ્ ॥

Encoded and proofread by Vishwas Bhide

*0 Shrimaddevibhagavatamahatmyam*

pdf was typeset on March 31, 2024

Please send corrections to *sanskrit@cheerful.com*